International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(1): 196-198
© 2023 IJSR
www.anantaajournal.com
Received: 05-12-2022
Accepted: 06-01-2023

**Padmanabhan P**
Research Scholar, Sri Chandrasekarendra Saraswathi Viswa Maha Vidyalaya, Tamil Nadu, India

**Corresponding Author:**
**Padmanabhan P**
Research Scholar, Sri Chandrasekarendra Saraswathi Viswa Maha Vidyalaya, Tamil Nadu, India

# मुहुर्तपदवी एकं परिचायनम्

**Padmanabhan P**

**सारांश**

केरलेषु प्रचुरप्रचारमाप्तः कश्चनग्रन्थः भवति मुहूर्तपदवी। अस्य व्याख्यानं वरदीपिका अपि प्रसिद्धा। एषः ग्रन्थः तु मलयाललिप्यां प्रसिद्धीकृतः भवति। एतस्य ग्रन्थस्य सामान्यपरिचयः एव अत्र उद्दिश्यते।

**कूटशब्द:** Muhoortha padavi

प्रस्तावना

केरलेषु विविधसंस्कृतशास्त्रेषु निष्णाताः अनेके पण्डिताः आसन्। तेषु अन्यतमः भवति मात्तूर् नम्पूतिरिप्पाट्। ज्योतिश्शास्त्रविदग्धः आसीत् मात्तूर् नम्पूतिरिप्पाट्। सः तु चेलक्करा समीपे पाञ्ञाल् इति प्रसिद्धे देशे जन्म प्राप्तवान्।

त्रिचत्वारिंशता पद्यैर्मुहूर्तपदवीमिमाम्
पाञ्ञालग्रामवास्तव्यो द्विजः कश्चिदरीरचत्।।

इति मुहूर्तपदवीनाम ग्रन्थे दृश्यते इत्यनेन तस्य कर्ता पाञ्ञालग्रामे वासम् अकरोत् इति ज्ञायते। मात्तूर् नम्पूतिरिणः कालविषये अपि चर्चा प्रचलतस्ति। 707 तमे कोल्लवर्षे आसीत् इत्यपि केचन वदन्ति। महिषमंगलं नम्पूतिरिः मुहूर्तपदव्याः व्यख्यानमकरोत् इति कारणेन मात्तूर् नम्पूतिरिः महिषमंगलात् पूर्विकः इति वक्तुं शक्यते। केरलीयानां मध्ये प्रचुरप्रचारं प्राप्तः ग्रन्थः भवति मुहूर्तपदवी। एतस्य ग्रन्थस्य आविर्भावेन अनेके ग्रन्थाः लुप्तप्रचाराः प्राप्ताः इत्यपि वक्तुम् शक्यते। ग्रन्थरचनाविषये काचित् कथा अपि श्रूयते। मुहूर्तावगमनाय बहवः ग्रन्थाः चेदपि तेषाम् अतिविस्तरत्वात् अतिगहनत्वाच्च सुमूर्तज्ञानं दुःष्करमित्यतः एकस्मिन् दिने ज्योतिश्शास्त्रपण्डितः स्वपिता एव पुत्रान् आहूय कल्पितवान् यत्- ज्योतिश्शास्त्रानुसारं नातिसंक्षेपविस्तरं

नातिसंवृतार्थं मन्दमतीनामपि सुबोधाय मुहूर्तग्रन्थं रचयतु – इति। तत्र त्रयः पुत्राः त्रीन् ग्रन्थान् विरचितवन्तः। तेषु षड्विंशत् श्लोकात्मकः मुहूर्तपदवीग्रन्थः एव समुपलभ्यते। त्रिषु ग्रन्थेषु प्रतिपादिताः श्लोकाः ग्रन्थानामादिविषयेषु सदृशाः इत्यनेन पूर्वोक्तकथां साधूकरोति। यथा प्रथमे ग्रन्थे-

प्रत्यूहप्रणिहन्तृकिञ्चन महस्सञ्चित्य भासां निधिम्भानुश्च क्रियते
मुहूर्तपदवी संक्षिप्तशास्त्रान्तरा
वर्ज्यावर्ज्य विवेकिनी कृतसदाचारानुसारा मया
सन्तुष्यन्तुतरां चिराय सुधियो देवाः प्रसीदन्तु वः
द्वितीये ग्रन्थे तु
चत्वारिंशता पद्यैरमुहूर्तपदवीमिमाम्
पाञ्चालग्रामवासस्तो द्विजः कश्चिदरीरचत्। इति।।
तृतीये ग्रन्थे
प्रत्यूहप्रतिहन्तारं पर्णिपत्यगणाधिपम्
मुहूर्तावगमे मार्गं ऋजुं कर्तुं यजामहो।। इति।

कुत्रापि ग्रन्थकारस्य नाम न सूचितमित्यतः ऊह्यते यत् पित्रा षड्त्रिंशत्शोकात्मकः तृतीयः ग्रन्थः उत्तमः इत्युक्त्वा मात्तूर्भवनस्य नाम्नि प्रकाशितः इति। अतः एव ग्रन्थकारः मात्तूर्नम्बूतिरिप्पाट् इति नाम्ना श्रूयते। मुहूर्तपदव्याः सप्ताधिकानि व्याख्यानानि समुपलब्धानि भवन्ति। तेषु श्री पुरयन्नूर्मनक्कल् परमेश्वरन् नम्पूतिरिप्पाट् महाशयेन क्रिस्ताब्धे 1815 तमे वर्षे कृता वरदीपिका नाम संस्कृतव्याख्या, आय्वाञ्चेरीतम्ब्राक्कल्महाशयस्य मुहूर्तभाषा, मयमङ्गलत्त् नम्पूतिरिमहाशयस्य बालशङ्करव्याख्या, कोलत्तरि शङ्करमेनोन्महाशयस्य व्याख्या च प्रसिद्धाः।

मुहूर्तविषयम् आधारीकृत्य बहवः पण्डिताः विभिन्नग्रन्थान् रचितवन्तः। एतान् अपेक्षया मुहूर्तपदव्याः बहुषु कार्येषु वैशिष्ट्यं दृश्यते। अत्र पञ्चसिद्धान्तं, षड्सूत्रं,मुहूर्तरत्नं,मुहूर्तदीपिका मुहूर्तमाधवीयम् इत्यादि अनेके मुहूर्तशास्त्रग्रन्थाः सत्सु अपि नूतनस्य मुहूर्तशास्त्रग्रन्थस्य निर्माणस्य प्रचोदनम् किमासीत् इति चिन्तनसमये तत्र अन्ये ग्रन्थाः सर्वे अपि विस्तृताः तथा अर्थावगमने दुर्गमाः च भवन्ति इति अवगन्तुं शक्यते। तेषु उत्सर्गापवादाः अधिकतया दृश्यते। एवमेव भिन्नग्रन्थेषु भिन्नरीत्या उक्तमित्यनेन शास्त्रतत्वावगमने साधारणजनाः क्लेशमनुभवन्ति इत्यतः तेषां कृते एकस्य ग्रन्थस्य आवश्यकता अस्ति इत्यतः एतस्य ग्रन्थस्य प्राधान्यं वर्तते।

विविधकर्मानुष्ठानानां निर्वहणाय सुसमयनिर्देशकं शास्त्रं भवति मुहूर्तशास्त्रम्। तत्र शुभाशुभसमयस्य सूचकमेव मुहूर्तपदव्यामपि दृश्यते। कृतकर्मवैशिष्ट्यानुसारमेव कर्मफलप्राप्तिः खलु । एतद्विषयप्रतिपादकाः बहवः ग्रन्थाः चेदपि तेषां अतिविस्तरत्वात् अर्थबाहुल्यात् च मन्दमतीनामपि सुबोधाय श्री मात्तूर्नम्बूतिरिप्पाट् महाशयः मुहूर्तपदवी नाम ग्रन्थं निर्मितवान्। पूर्वग्रन्थाशयान् संगृह्य केरलीयाचारपद्धत्यनुसारं विवाहादिषोडशसर्मणाम् औषधसेवा कृषियात्रादीनां सुमुहूर्तज्ञानाय सूत्ररूपा पद्धतिः निरूपितवान्।

केरले विद्यमानान् आचारान् अनाधृत्य केचन सिद्धान्ताः दृश्यते इत्यनेन तान् शास्त्रतत्त्वान् ग्रहीतुमपि न शक्यते। ऊहापोहेषु असमर्थाः तथा अल्पबुद्धयः एतादृशान् ग्रन्थान् पठित्वा शुभमुहूर्तकालम् अवगन्तुं कष्टताम् अनुभवन्ति। अतः एतान् प्रश्नान् परिहर्तुं तान् ग्रन्थान् सम्यक् अवगम्य गुरुजनानाम् उपदेशं ज्ञात्वा केरलानां सदाचारान् अवगम्य अधिगहनशब्दानाम् आधिक्यं विना एकस्य मुहूर्तपदवीग्रन्थस्य निर्माणे मात्तूर् नम्पूतिरिः सिद्धः अभवत्। एतस्य ग्रन्थस्य एतादृशाः योग्यताः वरदीपिका इति संस्कृतव्याख्यानस्य कर्ता अपि स्मारयति। पूर्वशास्त्रसम्प्रदायात् व्यतीत्य प्रत्येकविषयस्य मुहूर्तसूचना एव अत्र प्रस्तौति। पूर्वसम्प्रदायस्तु नक्षत्रवैशिष्ट्यं तिथिवैशिष्ट्यं राशिवैशिष्ट्यं च निर्दिष्टमासीत् इत्युक्ते अश्विनीनक्षत्रं केषु शुभकर्मसु स्वीकारः वा अस्वीकारः एवं प्रथमा तिथिः कुत्र स्वीकार्यः मेषराशिः केषु मुहूर्तेषु स्वीकुर्वन्ति इत्यादि चिन्ता पूर्वमासीत्। परन्तु मुहूर्तपदव्यां प्रथमं नित्यदोषाः इत्युक्ते सर्वशुभकर्मसु त्याज्याः विषयाः सूच्यन्ते। अनन्तरं कर्तृदोषान् सूचयति। तदनन्तरं प्रत्येकैकविषयस्य मुहूर्तान् सूचयति।

मुहूर्तपरान् सर्वविषयान् गाढतया स्पृश्यते अयं ग्रन्थः। अनेकान् विषयान् पञ्चत्रिंशेभ्यः श्लोकेभ्यः संगृह्य प्रतिपादयितुं असाधारणबुद्धिकौशलयुक्तेन पण्डितेन एव शक्यते इत्यत्र नास्ति संशयः। तादृशः असाधारणयुक्तः पण्डितः भवति अयं महानुभावः इति एतस्य ग्रन्थस्य पठनेन अवगम्यते।

सर्वशुभकर्मसु वर्जनीयान् दोषान् मुहूर्तपदव्याः आदिमभागे सूचयति।

उत्कोर्वीचलनोपरागगुलिकाषष्ठाष्टमान्त्येन्द्वस-
भृष्टा रूढविमुक्तराशिसितदृक्सायाह्नसन्ध्यादयः
गण्डान्तोष्णविषं स्थिरं च करणं रिक्तोष्टमीविष्टयो
लाटैकार्गलवैधृताहिशिरस्सर्वत्र वर्ज्या अमी।।

एतस्मिन् पद्ये ब्राह्मणादि वर्गाणां षोडकर्माणां नाम वदति। गर्भाधानं,पुंसवनं,सीमन्तं,जातकर्म,नामकरणं,निष्क्रामणं,अन्नप्राशनं,चौलं,उपनयनं, समावर्तनं, पाणिग्रहणम् इत्यादयः भवन्ति षोटशसंस्कारेषु प्रधानाः। एते निश्चितसमये निश्चितकर्मणा करणीयः इत्यस्ति। एतेषां शुभमुहूर्तान् मुहूर्तशास्त्रेषु प्रतिपाद्यन्ते। देवप्रतिष्ठा,गृहारंभः,औषधसेव,कूपखननं,आयुधसंग्रहं, प्रथमवस्त्रधारणं,यात्र,युगस्थापनं, भूमिकर्षणम् इत्यादीनां शुभमुहूर्तान् मुहूर्तपदव्याः अन्तिमे भागे सूचयति। मुहूर्तपदव्याः संगृह्य परिचयः एवं भवति। केरलीयज्यौतिषकानां मध्ये एतस्य प्रचुरप्रचारः अस्ति इत्यत्र नास्ति संशयः। मुहूर्तपदव्याः वरदीपिका नाम कश्चन प्रौढव्याख्यानं वर्तते। सविस्तरः कश्चन व्याख्या भवति वरदीपिका। आचारसंग्रहं, मुहूर्तमाधवीयं, सूर्यसिद्धान्तं, प्राचीनमुहूर्तपदवी , बालशङ्करं, मुहूर्तदीपकं, तन्त्रसंग्रहः अर्णवं, मुहूर्तरत्नं इत्यादिभ्यः अनेकशास्त्रग्रन्थेभ्यः प्रमाणान् उद्धृत्य व्याख्याता मूलग्रन्थस्य आशयान् विशदयति। आचारसंग्रहः,मुहूर्तमाधवीयम् इत्यादयोः एव अधिकतया प्रमाणान् स्वीकृतः इति द्रष्टुं शक्यते। मूलकारः इव व्याख्याता अपि केरलस्य शिष्टाचारस्य कृते प्राधान्यम् ददाति। शास्त्रं तथा सदाचारः च परस्परवैरुध्येन यत्र आगच्छति तत्र विमर्शनपूर्वकं किं स्वीकार्यमिति व्याख्यातृणा उपदिश्यते।

व्यतिपतस्य स्पर्शादारभ्य मोक्षान्तः कालो वर्जनीयः तच्छेषं नक्षत्रं न वर्जनीयमित्येके। तदुक्तं शास्त्रान्तरे।

विषप्रदिग्धेन हतस्य पत्रिणा
मृगस्य मांसं शुभदं क्षताद्यते।
यथा तथैव व्यतिपाददूषितः
क्षणस्तु वर्ज्यो न तु भ्रं न वा तिथि। इति।

एवं वचनेषु सत्स्वपि नैवमत्राचार लाटवैधृतयोर्मध्यमित्यादि प्रथमोक्तवदेव वर्ज्जनीयम् । एवं सदाचारः। इत्यादि स्थानेषु व्याख्याता स्वाभिप्रायान् स्थापयति। एवं मुहूर्तपदवी तथा तस्याः वरदीपिकाव्याख्यानम् च सर्वेषाम् बहूपकाराय भवति इत्यत्र नास्ति संशयः।

ग्रन्थ सूची

1. अष्टाङ्गहृदयम्
2. आचारपद्धतिः
3. मुहूर्तपदवी
4. 4.जातकादेशः